National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 89-91
© 2026 NJHSR
www.sanskritarticle.com

**अक्षयकुमाररायः**
अनुसन्धाता,साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अक्षयकुमाररायः**
अनुसन्धाता,साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतविजयनाटके धर्मशास्त्रीयमूल्यम्

**अक्षयकुमाररायः**

**नाट्यकारपरिचयः**

संस्कृतनाट्यरचनामाध्यमेन सामान्यजनेषु स्वातन्त्र्यानुरागोद्बोधकेषु प्राध्यापको मथुराप्रसाद-दीक्षितोऽन्यतमं स्थानं बिभर्ति। उत्तरप्रदेशप्रान्तान्तर्वर्त्तिनो हरदईजनपदस्य भगवन्तनगरनाम्निग्रामे कुन्तीदेवीबदरीनाथयोः पुत्रत्वेन १९३५ तमे वैक्रमाब्दे मार्गशीर्षमासे शुक्लपक्षे षष्ठीतिथौ लब्धजनिः श्रीमान् मथुराप्रसाददीक्षितः प्राथमिकीं शिक्षां स्वगृह एव समलभत। महाकवेरस्य पितामहः श्रीहरिहरप्रसाददीक्षित आयुर्वेदादिशास्त्रेषु कृतभूरिपरिश्रमो महान् वैद्य आसीत्। स एव मथुराप्रसादं शैशवे शास्त्राण्यध्यापयामास। उच्चशिक्षाप्राप्तये स वाराणसीं गत्वा काशिकराजकीय – संस्कृतमहाविद्या-लये प्रासरत्। तदानीं काश्यां काशिकराजकीयसंस्कृतमहाविद्यालये नानाशास्त्रनदीष्णा महान्त आचार्याः शास्त्राध्यापननिरता आसनिति तत्रैव गुरुनुपास्य मथुराप्रसाददीक्षितः साहित्याचार्यपदवीं प्राप्नोत्। साहित्ये संस्कृतसम्भाषणे व्याकरणादिशास्त्रेषु गद्य-पद्य- नाट्यादिप्रणयणे च तस्य सरस्वती सममेव प्रगल्भायते स्म। महानुभावस्याऽस्य शास्त्रनैपुणी विद्योपासनाजन्यकीर्तिश्च समस्तेऽपि राष्ट्रे प्रसृताऽभूदिति ससम्मानमयं लाहोरनगरस्थे एचिसनमहाविद्यालये संस्कृताध्यापनाय समाहूतोऽभवत्। तत्रोऽयं मनुस्मृतिप्रभृतिग्रन्थानध्यापयन् काव्यरचनामप्यकरोत्। मथुराप्रसाददीक्षितेन बहुनां ग्रन्थानां सानुवादं सम्पादनमकारि। व्याकरणे प्राकृतभाषायां धर्मशास्त्रे कामशास्त्रे च तेन विरचिता नैके ग्रन्थाः लभ्यन्ते। श्रीमता दीक्षितेन पृथ्वीराजोसोग्रन्थः सर्वप्रथमं सम्पादितः। वर्णसङ्करजानि – निर्णयस्तस्य धर्मशा-स्त्रीयो ग्रन्थः तेन सिद्धान्तकौमुद्याः प्राकृतप्रकाशस्य च सम्पादनं विहितम्। काव्यकला- कवितारहस्य-रोगिमृत्युविज्ञान- भगवच्चरणोत्प्रेक्षा- सन्धिसमासमञ्जूषाप्रभृतयो ग्रन्थास्तन्नैकशास्त्रपारङ्गतत्वं पिशुन-यन्ति। तेन प्रणीतानि काव्यानि सन्ति- १. भारतविजयनाटकम् २. शङ्करविजयनाटकम् ३. भक्तसुदर्शननाटकम् ४. भूभारोद्धरणनाटकम् ५. केलिकौतूहलम् ६. गान्धीविजयनाटकम् ७. वीरप्रतापनाटकम् ८. वीरपृथ्वीराजविजयम् ९. अन्योक्तितरङ्गिणी चेति। महाकवेरस्य नाटकानि बहुत्र सहस्राधिकजनव्याप्तस्थलेषु प्रदर्शितानि।

**भारतविजयनाटकम् -**

भारतविजयनाटकं प्रबलराष्ट्रीयचेतनायाः सम्बद्धं एकं नाटकमस्ति, भारते प्रायः शतवर्षेभ्यः आङ्गलशासकानां शोषणस्य, उत्पीडनस्य, दासतायाः चेतिहासः अस्मिन्नाटके वर्णिताः। आधुनिकना-ट्यसाहित्यपरम्परायां सम्भवतः इयम् अद्वितीया कृतिः अस्ति, यत्र नाट्यकारः राजकीय अथवा चरित्राभिनयस्य परम्परां विच्छिद्य भारतवर्षस्य जनानां तथा च वीरपुरुषानां दृढनिश्चयं त्यागं, भक्तिं च तेषां तीव्रराष्ट्रियभावनानां जागरिकृत्य आङ्गलसर्वकारस्य विरुद्धं सर्वेषाम् एकीकृत्य युद्धं कर्तुं आह्ववानं कृतवान्। 'भारतविजयम्' इति सप्तोऽङ्कीयनाटकस्य समर्पनपृष्ठमपि तस्य तीव्रराष्ट्रवादस्य पुष्टिं करोति इति – **'राष्ट्रियमिदं भारतविजयनाटकम्'**[1]। नाट्यकारः स्वस्य पूर्वानुमानमाधारिकृत्य भारतस्य स्वातन्त्र्यात् प्रायः दशवर्षपूर्वं (1937) भविष्यवाणीं कृतवान् – गान्धीजिः इत्यस्य अहिंसकान्दोलनस्य प्रभावेन आङ्गला शीघ्रमेव भारतं परित्यज्य स्वदेशं प्रति प्रत्यागमिष्यन्ति इति। अतः देशस्य

गम्भीरस्थितिं विचार्य बघाटस्य राज्ञा श्रीदूर्गासिंहेन तत् हृदयङ्गं कृतमासीत्। अतः नाटकस्य प्रकाशनं स्वातन्त्र्यानन्तरं (1947 तमे वर्षे) सम्भवम् आसीत्। एवं वयं पश्यामः यत्, अस्य नाटकस्य माध्यमेन मथुराप्रसाददीक्षितेन संस्कृतचेतनां समग्रराष्ट्रीयभावनायां लोकसंस्कृतेः आशा-निराशा- आनन्दशोकादिषु भावेषु च निमग्नाः कृतास्ति। वस्तुतः आधुनिकसंस्कृतनाटकेषु एतादृशं तीव्रराष्ट्रवादस्वरुपं दृष्ट्या 'भारतविजयनाटकम्' प्रथमप्रतिनिधिनाटकरुपेण गणयितुं शक्यते।

**धर्मशास्त्रस्य अर्थः**

धर्मशास्त्रं कल्पनाम्ना वेदाङ्गस्य विभागमेकमस्ति। धर्मसूत्राणि धर्मशास्त्राणि नाम्नाऽपि प्रसिद्धानि सन्ति। अस्माकं प्राचीनाः ऋषयः द्रष्टाश्च समाधिषु स्वस्य नित्यज्ञानप्रकाशेन प्रकाशितं पारम्पारिकज्ञानशरीरं वेदं मानवानां कर्तव्यज्ञानार्थं व्यञ्जयन्ति स्म। परन्तु ते केवलं विवेकशीलव्यक्तिनां कृते एव आसन्, न तु सामान्यजनानां कृते। अतः मनुः याज्ञवल्क्य इत्यादयः महान् ऋषयः एतत् जटिलज्ञानं सर्वेषां कृते उपयोगी कर्तुं धर्मशास्त्राणि रचयन्ति स्म। धर्मशास्त्रेषु बहुधा धर्मशासकैः महामुनिभिः कृतः वैदिकज्ञानं स्मारितं भवति। ताः रचनाः स्मृतिशब्देन इति उच्यन्ते स्म, तद्यथा - **'धर्मशास्त्रं तु वै स्मृतिः'**[2] । एवं प्रकारेण धर्मशास्त्रशब्देन धर्मसूत्रं स्मृतिं च स्मर्यते। **'धर्मस्य शास्त्रमिति धर्मशास्त्रम्'**[3] – अस्य वाक्यस्यानुसारेण धर्मशास्त्रस्यार्थः अस्ति यत्, ऋणनिक्षेपादिनिर्णयेन राज्ञः प्रजानामुपरि कृतः अनुशासनस्य माध्यमं 'धर्म' इति उच्यते। कालान्तरे धर्मशास्त्रीयग्रन्थाः अपि उपलभ्यन्ते, परन्तु व्यवस्थितविश्लेषणार्थं धर्मसूत्रस्मृतिग्रन्थेषु प्रदेय प्रस्थानम् स्वीकरणीयम्।

धर्मसूत्रादिग्रन्थानां कालपर्यन्तं वैदिकसमाजस्य महती विकासः अभवत्। तस्मिन् ग्रन्थे उल्लिखितानां रीतिनां एतावत्याः विकसिताः आसन् यत्, परम्पराक्रमेण मौखिकपरुपेण वा स्मरणं कठिनम् आसीत्। तस्मिन् समये लघुसूत्रग्रन्थरुपेण स्मार्तधर्मस्य व्यवस्थितीं कृत्वा संकलनं करणीयम् इति आवश्यकता अनुभयूयते स्म। फलतः स्मार्तधर्मस्य एतत् व्यवस्थितीकरणं सूत्ररुपेण सिद्धम् अभवत्। धर्मसूत्रलेखकाः न केवलं प्राचीनसंस्कारं व्यवस्थितीरुपेण प्रस्तुतवन्तः, अपि तु स्वसमयस्य सामाजिक-आर्थिक-राजनैतिक-धार्मिक-माङ्गल्याः आधारेण स्वमतानि प्रदत्तवन्तः। अस्मिनेव स्थितिविशेषे प्राचीनधर्मसूत्राणां रचना अभवत्।

**धर्मशास्त्रीयमूल्यम् –**

भारतीयधर्मशास्त्रस्य एतत् लक्षणं भवति यत्, एतेन शास्त्रेण मानवमूल्याधारितचिन्तनप्रक्रियायां दर्शनं सर्वदा प्रस्फुटितं वर्तते। तथा च अस्याः दार्शनिकनैतिकव्यख्यायाः परिणामः एव अस्ति यत्, अस्माकं भारतीय-संस्कृतिः शताब्दतः सम्पूर्णविश्वं प्रोत्साहनं कृत्वा **'वसुधैव कुटुम्बकम्' –** इति रुपेण सामूहिक-कल्याणस्य उपदेशं प्रदीयते। कार्लमार्कस् महोदयः अपि मानवशास्त्रीयऐतिह्यं सर्वकालिकनैतिकताञ्च उद्बोधयितुं प्रयत्नं चकार -

**"It enlightened self-interest is the principle of all morality it's necessary for the private interest of each person to coincide with the general interest of humanity……. If man is formed by circumstances, these……"** [4].

मथुराप्रसाददीक्षितेन यत् नैतिकं धर्मशास्त्रीयञ्च मूल्यं प्रकाशयितुं प्रयत्नः कृतः, तत् निश्चितरुपेण सार्वभौमिककल्याणस्य प्रतीकात्मकमस्ति। कालिदासः यत्र सौन्दर्यानुभवस्य सन्दर्भे सत्यस्य, समर्पणस्य, त्यागस्य तथा च नैतिकतायाः मूल्याङ्कनं कृतवान्, तत्रापि मथुराप्रसाददीक्षितेन सत्यस्य, पराक्रमस्य, शौर्यस्य, सत्याग्रहादि विषयाः प्रदर्शिताः। अपि च स्वस्य रुपकेषु राष्ट्रियसम्मानं, देशभक्तिः, राष्ट्रवादं मानवशास्त्रीयसंस्कृतिं च मूर्तरुपं प्रदत्तम्। फलतः आधुनिकसंस्कृतसाहित्यमपि हिन्दुस्तानीसाहित्यवत् देशस्य वर्तमान-समस्यानां सम्बोधनं करोति इति दृश्यते।

दानशाहस्य वचनाद् एवं ज्ञायते यत्, समाजे व्याभिचारः अतीवदुष्टः इति मन्यते, यथा – श्ववत् अवशिष्टं लेहयितुं समतुल्यम् अस्ति – **'उच्छिष्टभोजी खलु सारमेयस्तस्मात्परीवादपदं तु मा गाः'**[5]। सिराज-उद-दौल्ला इत्यस्य कथनेन ज्ञातं यत् ज्ञातिभिः, कुलगुरुणा सह कदापि वैरभावाचारः न करणीयम्, तथा च उक्तं – **'विद्वेषं मयि मित्र-बान्धवकुलाचार्यैः सहोत्पादयन्'**[6]। सः राजधर्मविषये उक्तवान् –

> **अर्थकामौ न धर्मेण प्रबाधेत विचक्षणः।**
> **धर्मकामौ न चार्थेन कामेनेतरद् द्वयम्।।**[7]

ततः परं धर्मोचित तथा राजोचितगुणानां विषयेऽपि उक्तवान् –

> **ईतावापत्तिकाले च प्रजानां पालनं चरेत्।**
> **व्यसनाद् भयतो रक्षेदेष धर्मो महीपतेः।।**[8]

ऐन्द्रजालिकेन उक्तं यत् –

> **विद्वेषकालुष्यकष्यायितस्वमीर्ष्याकुलं राज्यमदप्रमत्तम्।**
> **रामासु रक्तं विषयेषु सक्तं विभिन्नचक्रं विजहाजि पद्ममा।।**[9]

अनेन माध्यमेन प्रशासनविपुलधनसम्पदयोर्मध्ये अतीव सार्थक-सामञ्जस्यं स्थापयितुं प्रयत्नः कृतास्ति। प्रस्तुते नाटके विष्कम्भके दर्शयति यत् – **'तत्स्त्रियोऽपि ग्रहीतुं गच्छन्तो वृद्धेन जगन्नाथनाम्ना तदनुचारेण निरुद्धाः, स्त्रियश्च स्वकीयपातिव्रत्यरक्षायै अग्निं प्रज्वाल्य तत्रात्मानमजुहवुः।'**[10] अर्थात् भर्तुः अभावे भारतीयाः महिलाः स्वसतीत्वस्य रक्षणार्थं आत्महत्यां कुर्वन्ति स्म। समाजे घुसप्रथा आसीत् या अधुना समाजस्य प्रत्यके प्रान्ते प्रविष्टा अस्ति -**'………स्थितास्त्व-दीयाननुचरानुत्कोचेनात्मसाकृत्वा किमत्यकथनीयं कर्तुमभिलषन्ति।'**[11] सिराज-उद-दौल्ला वञ्चनं, विश्वासघातं, असत्यं, धनलोभं च दुष्टतं मन्यते स्म –

> **नैते प्रपञ्चरचनादुपयान्ति भीतिं विश्वासघातकरणादपि नोद्विजन्ते।**
> **येषां मृषैव शरणं, धनमेव मोक्षस्तरेषामुदेतु हृदये कथमेष तेजः।।**[12]

ईश्वरस्य कार्येषु तस्य गहनविश्वासः आसीत् – **'(मनसि) अघटित-घटनापटीयसः परमात्मनो विचित्रमेवचरित्रम्'**[13]। शत्रुपक्षतः आगता-

नां दुःखितानां शरणार्थिनां परित्यागेन यत् पापं भवति,तद् अक्षम्यम् इति सः मन्यते स्म –

**शत्रुभीत्या समेतानां दुःखिनां शरणार्थिनाम्।**
**परित्यागे तु यत्पापं न तत्केनापि मीयते।।**[14]

एतेन भारतीयसंस्कृते मानवीय-करूणा-सहानुभूतिः भावनानां अस्तित्वं स्पष्टतया दृश्यते। गङ्गासिंहः अबधराज्यस्य नवाबस्य वर्णनं कुर्वन् कथयति यत् - **'तस्य राज्ये कुत्रापि चोरः नास्ति, न च कदापि कोऽपि मृषा वदति, न च कोऽपि द्यूतकार्यं करोति। सः विद्वान् सज्जनैः सह वसति'।** एतेन स्पष्टतया ज्ञायते यत् एतानि कार्यानि समाजे अनैतिकानि मन्यन्ते, यत् भारतीयसंस्कृतेः दृष्ट्या यथार्थं अस्ति। साधु-महात्मानां गुणैः सह सम्बद्धाश्रद्धाः तेषां आशीर्वादाश्चापि समाजे दृश्यन्ते – **'सूनुं साधुपदे निधाय तपनं भित्त्वा प्रलीनात्मनि'**[15]। भारतमातुः वचनया ज्ञायते यत् तदानीन्तनसमाजे सतीप्रथाः दृढमूला आसीत्, एषा प्रथा आधुनिककाले अमानवीया इव भासते – **'सखी (अश्रूणि प्रमृज्य) – मातः। पश्य। भस्मावशेषा सञ्जाता राज्ञी। सर्वथा गतैवं।' भारतमाता (अश्रूणि प्रमृज्य) –**

**कर्माण्याचरितान्यस्या जीवन्तीं कुर्वते त्विमाम्।**
**एषा प्रलयपर्यन्तं मयैव सह यास्यति।।**[16]

एतेन एवमपि प्रकाशयति यत् – जनसमूहानां मध्ये लौकिक-आध्यात्मिकप्रत्ययेषु पूर्णविश्वासः आसीत्। भारतमाता युद्धस्य विनाशकारीशक्तेः नकारात्मकपरिणामान् अवगच्छति स्म, अतएव सा अहिंसकत्वेन स्वातन्त्र्यसङ्घर्षं प्रज्ज्वलयितुम् इच्छति स्म। अद्यत्वे सम्पूर्णजगतः कृते एतादृशी नीतिः स्वीक्रियताम् –

**युद्धे प्राणिवधः क्षितौ विकलता लोकेषु विभ्रान्तता,**
**बालस्त्रीस्थविरेषु धीतरलता दीनालसेष्वार्तता।**
**रुग्णान्धेषु विकर्मता मुनिजनेष्वज्ञेषु चाकमेता,**
**तत्स्वातन्त्र्यमिदं रणान्त कलये स्यात् किन्त्वहिंसा व्रतात्।।**[17]

महात्मागान्धीनः वचनेन स्पष्टतया ज्ञायते स्वदेशस्य भारतस्य धार्मिकचिन्तने, उपलब्धिषु च तस्य गहनविश्वासः प्रदर्शितः आसीत्– **'शास्त्राभ्यासपरीक्षणे च वयं सर्वदैव जितवन्तः'**[18]। सः राजसुखं भोगं च क्षणिकं व्यर्थं च मन्यते स्म, एतत् वचनं सर्वथा समीचीनं न दृश्यते। परन्तु योगशास्त्रं, ब्रह्माज्ञं च मौलिकभारतीयवुद्धिनिधिः आसीदिति तस्य मतम् - **'राज्योपभोगादिकं क्षणिकमकिञ्चित्करञ्च परिज्ञाय योगब्रह्मज्ञानादि कमात्यान्तकसुखसाधकमस्मदीयैरेव प्रकटीकृतम्'**[19]। एतत् तथ्यं न्याय्यं ऐतिहासिकदृष्ट्या च समीचीनं अस्ति। मालवीयाः अपि मृतस्योपरि गोलिकाण्डं कापुरुषतां इति मन्यन्ते - **'किमिदं नाम शौर्यं यन्मृतेषु शत्रुपातः'**[20]। सम्पूर्णानन्दः स्वीयं भीमवत् शक्तिशालीनः, अपि च आङ्गलाजनान् जरासन्धाः इव मन्यते स्म।

**सन्दर्भाः**

1. भारतविना, समर्पणम्
2. मनुस्मृतिः, 2.10
3. पी.वी.काणे. धर्मशास्त्र का इतिहास, भाग-1.पृ.1
4. The Holy Family, Chapter – VI
5. भारतविना, प्र.अ. पृ. 20
6. तदेव, पृ. 21
7. तदेव, पृ. 22
8. तदेव,
9. भारतविना, द्वि.अ. पृ. 32
10. तदेव, पृ. 38
11. तदेव, पृ. 42
12. तदेव.
13. तदेव, पृ. 43
14. तदेव, पृ. 44
15. भारतविना, प.अ. पृ. 134
16. तदेव, पृ. 135
17. तदेव, पृ. 139
18. भारतविना, ष.अ. पृ. 160
19. तदेव, पृ. 161
20. तदेव, पृ. 165